M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 43

Title: Chitrarupavartika

43

Chitrarupa Viveka	Title
	Author
	Editor
	Year, Vols.
	Publisher
43 नी (न्याय)	Remarks

श्रीगणेशाय नमः ॥ विद्यानिवासपुत्रस्य न्यायवाचस्पतेरियं । निर्मितिर्निर्मलधियामानंदयतु मानसं ॥ १ ॥ नीलरूपासमवायिकार 43
णकरूपत्वं पीतरूपासमवायिकारणकत्वं भिन्नं वा नीलरूपपीतरूपासमवायिकारणकरूपासमवायिकारणं न वा नीलरूपं नीला
न्यासमवायिकारणं न वा इति चित्ररूपे विप्रतिपत्तिः ॥ ननु नीलरूपासमवायिकारणकं पीतरूपासमवायिकारणकं न वा इति विप्र
तिपत्तिः ॥ नीलरूपासमवायिकारणस्य नीलस्य पक्षत्वे बाधात् चित्ररूपस्य पक्षत्वे आश्रयासिद्धिः ॥ नानारूपवदवयवारब्धस्य
अवयविनो न तावन्नीलरूपमनन्वयाद्युत्पत्तिप्रसंगात् नचावयवरूपमेव स्वाश्रयसमवेतत्वप्रमासमाहितुः चित्रावयवारब्धावयविप्र
त्यक्षे तथापि व्यभिचारात् नच अव्याप्यवृत्तीनि नानारूपाणि अव्याप्यवृत्तेर्व्याप्यवृत्तिनिजातीयतानिरोधात् नापि व्याप्यवृत्तीनी नीला
वयवावच्छेदेन सन्निकर्षे रक्तरूपादेरुपलंभापत्तेः अतो नीलपीतादिरिरेकं संभूय चित्रं रूपमारभ्यते नच सामग्रीसत्वान्नीलादिभिन्नो
त्पादे रूपे तद्वन्नापत्तिः अगत्या नीलेतररूपादे नीलादिकं प्रतिप्रतिबंधकत्वकल्पनात् प्रतिबंधकतावच्छेदकसंबंधश्च समवायिसमवेतत्वं प्र
तिबध्यतावच्छेदकश्च समवायः कपालादौ नीलेतररूपसहिते घटे समवा × संक । येन नीलादेरनुत्पादात्तथापि चित्रत्वावच्छिन्नजनकता
वच्छेदकं किं इति चेत् रूपत्वमित्येवेति । नन्वेव अवयवे केवलनीलसत्वे चित्ररूपोत्पादः स्यात् नस्यात् हेत्वंतरविरहात् नीलेतरवी
तेतररूपत्वादिना चित्रत्वावच्छिन्ने हेतुत्वात् केवलनीलसत्वे नीलेतरस्य विरहात् नाचित्रोत्पादः एवं केवलरक्तादिसत्वे रक्तेतरादेर्वि
रहान्नतथा वस्तुतो नीलकपालावच्छेदेन पाकान्नीलनाशे सति रक्तोत्पादकाग्निसंयोगे सत्त्वे सति कपालांतरे विद्यमानान्नी
लरूपाच्चित्रोत्पत्तिः नैयायिकनये न स्यात् नीलेतररूपाभावात् नीलाभावपीताभावादीनामवयवस्थितानां चित्रत्वावच्छिन्नं
प्रति हेतुता हेतुताघटकश्च स्वाश्रयसमवेतत्वसंबंधः कार्यताघटकः समवायः अतो न कोऽपि दोषः नीलेतररूपासमवायिकारणत्वेन
वहेतुता तदसमवायिकारणं च नीलेतरं रूपं रक्तोत्पादकाग्निसंयोगश्च व्यापकश्चेत् नन्वेवं अवयवांतरे नीलसत्वे अवयवांतररक्त
रूपस्य पाकेन नाशे पाकांतरेण नीलोत्पादकेनापि चित्ररूपजननप्रसंगः नीलाभावादेः सत्वादिति वाच्यं नीलरूपस्य नीलोत्पा
दकाग्निसंयोगान्यतरत्वावच्छिन्नाभावादेः प्रतियोगिव्यधिकरणस्य हेतुत्वादतो नीलोत्पादकाग्निसंयोगस्याव्याप्यवृत्तित्वेपि
नो तत्र चित्रोत्पादः रूपजन्यतावच्छेदकं विजातीयचित्रत्वं अग्निसंयोगजन्यतावच्छेदकं वापरं अतो विनापि रूपं भिन्नाभिन्नाव
यवावच्छेदेन रक्तपीताद्युत्पादकाग्निसंयोगे चित्ररूपोत्पादेपि न व्यभिचारः अग्निसंयोगजन्यविजातीयचित्रं प्रति अवच्छेद
कतासंबंधावच्छिन्नप्रतियोगिताकः नीलजनकाग्निसंयोगादेरभावाः अवयवनिष्ठाः पूर्वोक्तप्रमासमाहितत्वः रूपजनकपि

नि·वा·

जातीयाग्निसंयोगश्च हेतुः तेनाग्निसंयोगसामान्याभावस्थले नाग्निसंयोगजचित्रजातीयचित्रोत्पत्तिश्च अग्निसंयोगजचित्रं प्रति अ
वयवनिष्ठरूपसामान्याभावः उक्तप्रसङ्गहेतुः अतः एकावयवे नीलहेतोः अवयवान्तरावच्छेदेन रक्तोत्पादकाग्निसंयोगसत्वेपि नाग्निसं
योगजचित्रजातीयोत्पत्तिः नचतत्राग्निसंयोगजं चित्रमुत्पद्यते रूपजचित्रे ग्निसंयोगाविरहकरीति तन्नोत्पद्यत एवेति किं न स्यादितिचे
न नीलादिहेतुविजातीयाग्निसंयोगाभावानां रूपजचित्रे हेतुत्वमपेक्ष्य लाघवेन रूपसामान्याभावस्यैव अग्निसंयोगजचित्रे हेतुत्व
त्वानादिति केचित्तु चित्रत्वेन रूपत्वेनैव कार्यकारणभावः विजातीयचित्रं प्रति नीलपीतादिविजातीयचित्रं प्रति च नीलपीतरक्तादीनां हेतुता
विशेषसामग्र्यभावान्नान्यत्र चित्रोत्पाद इत्याहुः नवीनास्तु निष्प्रामाणिक एव अव्याप्यवृत्तिव्याप्यवृत्तिजातीयताविरोधः चित्ररूपस्थले
न नीलेन नीलजनने बाधकाभावात् नीलेतररूपादेर्नीलं प्रति प्रतिबन्धकत्वकल्पने गौरवाच्च अव्याप्यवृत्तीन्येव नानारूपाणि अतएव लोहितोय
स्तुबंधान मुखे पुच्छे च पाण्डुर इत्यादिशास्त्रं त्रिः श्वेता एकपी सादयो व्यवहाराश्चोपपद्यते नचैवं क्वचित्किंचिदवच्छिन्ने नीलादिकं किंच अ
नवच्छिन्नमुपपद्यते इत्यत्र किं नियामकं अवच्छेदकतासंबंधेन नीलं प्रति समवायेन नीलादेर्हेतुत्वात् यद्वा नानारूपवत्कपालाद्यार
ब्धघटादौ कपालावच्छेदेन नीलाद्युत्पत्तिवारणाय यावच्छेदकसंबंधेन नीलं प्रति नीलेतररूपं समवायेन प्रतिबंधकं अतो न तत्र कपाल
वच्छेदेन रूपोत्पत्तिः किंतु नीलकपालिकावच्छेदेन नचसर्वनीलारब्धघटादौ नीलरूपादेरव्यवच्छेदः स्यादिति उक्तसामग्री स
वच्छेदेन रूपोत्पत्तिः किंतु नीलेतररूपस्यापि हेतुत्वाल्कपालतादिकस्य संबंधश्च स्वसमवायिसम
वादितिवाच्यं अवच्छेदकतासंबंधेन नीलं प्रति अवयवान्तरवृत्तिनीलेतररूपस्यापि हेतुत्वात् एतदुक्तरताघटकसंबंधश्च स्वसमवायिसम
वेतद्रव्यसमवाय एवच यत्तु व्याप्यवृत्तिनीलस्थले अव्याप्यवृत्तित्ववारणाय नीलेतररूपविशिष्टनीलत्वेन अवच्छेदकतासंबंधे
न रूपं प्रति हेतुता वैशिष्ट्यं च पूर्वोक्तमेवेति तन्न नीलविशिष्टनीलेतरस्यापि एवं हेतुतावृत्तौ पृथक्पृथक्कार्यकारणभा
वात् वस्तुतस्तु कपालान्तरावच्छेदेन रक्तरूपजनकाग्निसंयोगसत्त्वे कपालान्तरवर्तमानात् नीलादेरपि अव्याप्यव
त्तिनीलं व्याप्यन स्यात् अतो नीलाभावो नीलं प्रति हेतुः कार्यता घटकः संबंधावच्छेदकं कारणताघटकः स्वा
श्रयवृत्तिद्रव्यसमवायः एवं पीतरूपादौ पीतरूपाभावस्तथा एतेन नीलेतररूपाभावः सामानाधिकरण्यसंबंधावच्छिन्नप्रति
योगिताको यदवच्छेदेन तदवच्छेदेन नीलमुत्पद्यते व्याप्यवृत्तिनीलस्थले तु नीलेतराभावो नावच्छिन्नवृत्तिः अतो नीलव्याप्यवृत्ति
नीलं नीलपीतावयवस्थले च सामानाधिकरण्येन नीलेतराभावो नीलावयवावच्छेदे नैवेति नीलमुत्पद्यते इति निरस्तं सामा
नाधिकरण्यस्य व्याप्यवृत्तित्वेन तेन संबंधेन नीलेतराभावस्यासत्वाच्च नच रक्तनीलाभ्यामारब्धे वयविनि पाकेन रक्तं वि
नाश्य नीलमुत्पाद्यते यत्र सर्वावच्छेदेन नीलं जनितं तत्राव्याप्यवृत्तिनीलापत्तिः नीलाभावस्य अवयवान्तरे सत्त्वादितिवाच्यं

नीलजनकाग्निसंयोगान्यतरत्वावच्छिन्नाभावस्य स्वाश्रयवृत्तिद्रव्यसमवायसंबंधेन अव्याप्यवृत्तिनीलं प्रति हेतुत्वादिति अत्रा
स्माकं प्रतिभाति चित्ररूपस्वीकारपक्षे नीलादिकं प्रति नीलेतरादीनां प्रतिबध्यप्रतिबंधकाभावाः बहवः कल्पनीयाः नी
लाभावादीनां चित्ररूपं प्रति हेतुता कल्पनीया अव्याप्यवृत्तिरूपपक्षे अवच्छेदकतासंबंधेन नीलादिकं प्रति नीलेतररूपादिकं समवाये
न प्रतिबंधकं व्याप्यवृत्तिनीलस्थले अवच्छेदकतासंबंधेन नीलोत्पत्तिवारणाय पूर्वोक्तद्रव्यघटितसंबंधेन नीलाभावादीनां अवच्छेदकतासंबंधेन नी
लादिकं प्रति हेतुता कल्पनीयेति कार्यकारणभावकल्पना तुल्या तथाच अव्याप्यवृत्तिरूपपक्षे चित्रस्थले अवयविनि बहूनि रूपाणि नध्वंस
प्रागभावादि कल्पनीयानि चित्रपक्षे एकमेव रूपमिति लाघवं किंच व्याप्यवृत्तिरूपपक्षे अवच्छेदकतासंबंधेन रूपउत्पन्ने पुनस्तेनैव संबंधेन
अवयवे रूपोत्पत्तिवारणाय अवच्छेदकतासंबंधेन रूपं प्रति अवच्छेदकतासंबंधेन रूपं प्रतिबंधकं कल्पनीयमिति गौरवं नचैवं यदवच्छेदेन तासंबं
धेन अवयवे रूपमुत्पद्यते तदवयविन्यपि समवायेन वर्तिष्यते अवयविनि च रूपसामग्री नास्ति रूपं प्रति प्रतिबंधकस्य रूपस्य सत्त्वात् इति वाच्यं
एवं हि अवयविनिष्ठरूपाभावस्य अवच्छेदकतासंबंधेन रूपं प्रति हेतुत्वं वाच्यं तथाच नानारूपवत्कपालघटस्य नीलरूपादेरवच्छेदकं न कपाल अ
तिप्रसंगात् किंतु नीलकपालिकादिरूपान्तरेण अस्मात् तत्र कपालरूपे अवयविनि रूपसत्त्वेन रूपसामग्र्यभावादिसाम्यम् यदि तु स्वाश्रयसंबंधेन नी
लं प्रति नीलरूपं हेतुरुच्यते नीलपीताद्यारब्धस्थले च स्वाश्रयसंबंधेन नीलरूपस्य पीतकपालेपि सत्त्वेन व्यभिचारात् वदनतत्र नील
हेतुस्यादतो हेत्वभावादेव नीलोत्पत्तिरिति नीलं प्रति नीलेतररूपादेः प्रतिबंधकत्वे चित्ररूपवादिनानकल्पनीयमिति विमर्शनीयं तदा
चित्ररूपपक्षे सुतरां लाघवं यदि वा अव्याप्यवृत्तिरूपवादिना अवयवनीलस्य अवयविनीलहेतुतया नीलत्वेन विजातीयनीलत्वेन कार्यकारण
भावः कल्पनीयः चित्ररूपादिना तु नीलं प्रति नीलेतरस्य प्रतिबंधकत्वमेव वाच्यं तावता चित्ररूपस्थले नीलरूपानुत्पत्तिः शुक्लपटादौ
तदनुत्पत्तिः संगच्छते संयोगाजन्यरूपं प्रति रूपत्वेनैव हेतुत्वमभ्युपेयते तदपि चित्ररूपपक्षे लाघवमिति यदा तु नीलाभावपीताभा
वादिकूटत्वेन चित्ररूपं प्रति हेतुता कारणताया अवच्छेदकः स्वाश्रयसमवेतत्वं संबंधः कार्यताया श्च समवाय इति पूर्वोक्तरीत्या च नी
लादौ कार्यकारणभावः तदापि चित्ररूपकल्पे लाघवमिति एतेनापि सामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताको नी
लेतराभावो वच्छेदकतासंबंधेन नीलं प्रति हेतुरिति पूर्वोक्तकल्पोपि निरस्तः केचित्तु व्याप्यवृत्तीन्येव नानारूपाणि अव्याप्य
वृत्तिपक्षे दूषणमभिहितमेव चित्ररूपपक्षेपि नीलाभावादीनां चित्रं प्रति हेतुत्वकल्पने गौरवात् मत्पक्षे नीलादेर्नीला
देर्नीलादिकं प्रति हेतुत्वं उभयं स्वीकृतमेव तावतैव अवयविनि नीलपीतादेरुत्पत्तिः नच गुणगुणाविरोधान्नीलेतरादेर्नी
लादिकं प्रति बंधकत्वकल्पनात् नच पीतकपालावच्छेदेन चक्षुःसंयोगे सति नीलादेरुपलंभापत्तिः नीलरूपवदवयवाव
च्छिन्नचक्षुःसंयोगस्य नीलप्रत्यक्षे हेतुत्वात् अव्याप्यवृत्ति नीलादिनापीदं स्वीकरणीयं यदुक्तं कपालावच्छिन्नसंयो

विभागादिप्रत्यक्षानुरोधेन एतत्कपालानवच्छिन्नवृत्तिकत्वे सति यन्नीलान्यतद्भिन्नं यदेतद्घटसमवेतं तस्यैतत्क-
पालविषयकोयः साक्षात्कारः तं प्रति एतत्कपालावच्छेदेन एतद्घटचक्षुःसंयोगस्य हेतुत्वात् इदं च कार्यतावच्छेदकं
चित्र.वा. सत्याप्यभ्युपेयमिति यद्वा नीलरूपवदवयवावच्छेदेन संनिकर्षस्य नीलरूपप्रत्यक्षे हेतुता वाच्या। एवं पीतादिप्रत्य-
२ क्षेपि न च गौरवं अव्याप्यवृत्तिपक्षे नीलाभावादेः प्रतिबंधकत्वे नीलाभावादेश्च हेतुत्वं कल्प्यमिति तत्प्रत्यक्षे एव
गौरवादिति दिक्। स्पर्शानुरूपतुल्यैवरीतिरनुसर्तव्या। रसगंधौ तु न चित्रौ किंतु नीरसादिरेव तत्रापि अवयवी
व्याप्यवृत्ती एवं तौ। तदुत्पत्तिप्रतिबंधककल्पने मानाभावात् गौरवाच्चेति न किंचिदेतत् इति चित्ररूपविवेकः